# २०२१–२२

## शास्त्रीपरीक्षा

## खण्डः- प्रथमः, अधिसत्रं- द्वितीयम्

## विषयः-संस्कृतम् ('ख' वर्गः), पत्रं- सप्तमम्

---

**समयः ३½ होराः** **सम्पूर्णाङ्काः- ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. केचन अष्टौ प्रश्नाः समाधीयेरन्-** ८x२=१६

**क.** बोधिचर्यावतारस्य रचनाकारः कः?

**ख.** पुरुषार्थसाधनी का?

**ग.** विद्युत् क्षणं किं दर्शयति?

**घ.** महत्सुघोरं कस्य बलम् अस्ति?

**ङ.** सुखं केन प्रवृद्धम्?

**च.** अशुचिप्रतिमां गृहीत्वा किं करोति?

**छ.** जगदेकसार्थवाहः कः?

**ज.** कः सततं फलति?

**झ.** केन शुभेन पापं जीयते?

**ञ.** कृते यः प्रतिकुर्वीत तस्य किं भवति?

**ट.** कः कल्पान् नरकेषु आवसति?

**२. केचन त्रयः प्रश्नाः समाधेयाः -** ३x६=१८

**क.** बुद्धानन्तरमार्यसंघः तदनु धर्म इति व्यतिक्रमनिर्देशः कथं? समाधीयताम्।

**ख.** अक्षणाः के? विलिख्यन्ताम्।

**ग.** आर्यमैत्रेयविमोक्षे किं लिखितम्? सप्रसङ्गं विलिख्यताम्।

**घ.** बुद्धपूजा कथं विशिष्यते? विविच्यताम्।

**ङ.** दुःखमेवाभिधावन्ति दुःखनिःसरणाशया अस्याः पंक्त्याः किं तात्पर्यम्?

**३. बोधिचर्यावतारग्रन्थस्य वैशिष्ट्यं प्रतिपाद्यताम्।** **६**

**अथवा**

बोधिचर्यावतारकारस्य जीवनचरितं विलिख्यताम्।

**४. अधोलिखितेषु किमपि पद्यद्वयं सप्रसङ्गं व्याख्येयम् ?** **१०x२=२०**

**क.** रात्रौ यथा मेघघनान्धकारे
विद्युत् क्षणं दर्शयति प्रकाशम्।
बुद्धानुभावेन तदा कदाचि-
ल्लोकस्य पुण्येषु मतिः क्षणं स्यात्।।

**ख.** कदलीव फलं विहाय याति
क्षयमन्यत् कुशलं हि सर्वमेव।
सततं फलति क्षयं न याति
प्रसवत्येव तु बोधिचित्तवृक्षः।।

**ग.** कस्य मातुः पितुर्वापि हिताशंसेयमीदृशी।

देवतानामृषीणां का ब्रह्मणां वा भविष्यति।।

**५. कमप्येकविषयमाश्रित्य निबन्धो लेख्यः-** **१०**

**क.** वैभाषिकमतम्

**ख.** क्षणभङ्गवादः

**ग.** स्कन्धः

******************